श्रीमते रामनन्दाय नमः ।

श्रीरामलीलातत्त्वभास्करः

प्रारम्भः ।

कर्त्तारं सर्वलोकानां दातारं सुखसंपदाम् ।
हर्त्तारं सर्वविघ्नानां श्रीरामं प्रणमाम्यहम् ॥ १ ॥
यस्याःस्मरणमात्रेण नाशमायान्ति पातकम् ।
सूर्योदयात्तम इव रामलीलां नमामि ताम् ॥ २ ॥

अथ भगवल्लीलाविद्वेषिणां मतं प्रथममुत्थाप्य खण्डयति ॥ पुराणादिविरुद्धत्वादुपहासस्वरूपतः । अशिष्टसंगृहीतत्वाद्धरिलीलां न कारयेत् ॥ ३ ॥ एवं मा वद दुर्बुद्धे यत उक्तियुक्तिका ॥ अयं भावः॥ पुराणादिषु लीलाया विधिदर्शनान्न विरुद्धत्वम् ॥ तथा च रामार्चनचन्द्रिकायां हरिभक्तिविलासे च । आश्विनमासकृत्ये श्रीमदानन्दवनश्रीगोपालभट्टोदाहृतविष्णुधर्मोत्तरवचनानि ॥ आश्विनस्य सितेपक्षे दशम्यां विजयोत्सवे । कर्त्तव्यो वैष्णवैस्सार्द्धं सर्वत्र विजयार्थिभिः॥रथमारोप्य देवेशं सर्वालंकारभूषितम् । सासितूणधनुर्बाणपाणिं नक्तं च रान्तकम् ॥ स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् । रथैरश्वैर्गजैःपद्भिः सौमित्रिप्लवगादिभिः ॥ युतं राजोपचारैस्तं शमीं प्रति समानयेत् । शमीवृक्षार्चनं कुर्य्य इति संक-

स्य पूजयेत् ॥ विष्णुधर्मोक्तमार्गेण यात्रानिर्विघ्न सिद्धये । सीताकान्तं शमीयुक्तं भक्तानामभयंकरम् ॥ अर्चयित्वा शमीवृक्षमर्चयेत् विजयाप्तये । शमी शमयते पापं शमीलोहितकण्टका ॥ धरित्र्यर्जुनबाणानां रामस्य प्रियवादिनी । करिष्यमाणा या यात्रा यथाकालं सुखं मया ॥ तत्र निर्विघ्नकर्त्री त्वं भवित्री रामपूजिते । गृहीत्वा चाक्षतैः सार्द्धं शमीमूलगतां मृदम् ॥ गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत् । कैश्चिदृक्षैस्तत्र भाव्यं कैश्चिद्भाव्यं च वानरैः ॥ कैश्चिद्रक्तमुखैर्भाव्यं कोशलेन्द्रस्य तुष्टये । निर्जिता राक्षसा दैत्या वैरिणो जगतीतले ॥ रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् । आनीय स्थापयेत्सुस्थं दिव्यं सिंहासने विभुम् ॥ ततो नीराज्य देवेशं प्रणमेद्दण्डवद्भुवि । तेनोपभुक्तं वस्त्रादि धारयेत्स्वजनैः सहेति ॥ ऋक्षादिविभाव्यमिति तच्चेष्टादिकमनुसर्तव्यमित्यर्थः॥ हरिभक्ति विलासे—श्रीमद्गोपालभट्टोदाहृतविष्णुयामलवचनेऽपि हरिलीलाविधिः ॥ गुरुः परीक्षयेच्छिष्यं संवत्सरमतन्द्रितः । नियमान् विहितान् वर्ज्यान् श्रावयेच्च चतुःशतम् ॥ तत्र विहितानाह ॥ यथा स्वमुद्रारचनं गीतनृत्यादिभक्तितः । शंखादिध्वनिमांगल्य लीलाद्यभिनयो हरेः॥अभिनयो नाटकम् । महाभाष्येऽपि तृतीयाध्यायस्य प्रथमपादे, द्वितीयाऽऽह्निकान्ते ॥ चिरहते च कंसे चिरबद्धे च

बलो । अत्रापि युक्ता कथम् । ये तावदेते शोभिका नाम एते प्रत्यक्षं कंसं घातयन्ति प्रत्यक्षं च बलिं बन्धयन्तीति चित्रेषु कथम् । चित्रेष्वपि उद्गूर्णा निपतिताश्च प्रहारा दृश्यन्ते कंसस्य कृष्णस्य च । ग्रन्थिकेषु कथं यत्र शब्दग्रन्थनमात्रं लक्ष्यते तेऽपि तेषामुत्पत्तिप्रभृत्याविनाशात् तद्बुद्धिं व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ति । अतश्च सतो व्यामिश्राश्च दृश्यन्ते केचित् कंसभक्ता भवन्ति केचिद्वासुदेवभक्ताः । वर्णान्यत्वं खल्वपि पुष्यन्ति । केचित्कालमुखा भवन्ति । केचिद्रक्तमुखा त्रैकाल्यं खल्वपि लोके लक्ष्यते । गच्छ हन्यते कंसः । गच्छ घानिष्यते कंसः किं गतेन हतः कंसः । अत्र कैयटः । चिरहते । इति ॥ चिरप्रवृत्तत्वाद्वध्यघातकभावस्य प्रयोजकव्यापाराभावस्य वर्त्तमानत्वासम्भवात्, उपसंख्यानारम्भे तु न दोषः । आख्यानस्य वर्त्तमानत्वादित्यर्थः । शौभिका इति—कंसाद्यनुकारिणां नटानां व्याख्यानोपाध्यायाः कंसानुकारो नटः सामाजिकैः कंसबुद्ध्या-गृहीतः कंसो भाष्ये विवक्षितः ग्रन्थिकेष्विति कथकेष्वित्यर्थः । तेपीति तदुक्तं हरिणा ॥ शब्दोपहितरूपांस्तु बुद्धेर्विषयतां गतान् । प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यत इति ॥ शिष्टं भाष्यं स्पष्टम् ॥ उपहासस्वरूपकत्वमपि न धर्ममार्गप्रवर्त्तकत्वात् ॥ तथा च रामतापिन्याम् । धर्ममार्गं चरित्रेण ज्ञानमार्गश्च

नामतः। तथा ध्यानेन वैराग्यमैश्वर्यं यस्य पूजनात्। धर्ममार्गं चरित्रेणेति। श्रीरामस्य चरित्रं दृष्ट्वा अन्येऽपि राजानस्तथा कुर्वन्ति। अशिष्टसंगृहीतत्वमपि न॥ यतः शिष्टाःप्रद्युम्नादयः श्रीरामलीलानाटकं कृतवन्त-स्तथा च हरिवंशेऽष्टचत्वारिंशदधिकशततमेऽध्याये, रामायणं महाकाव्यमुद्दिश्य नाटकीकृतम्। जन्म-विष्णोरमेयस्य राक्षसेन्द्रवधेप्सया। रोमपादो दश-रथ ऋष्यशृंगम्महामुनिम्॥ शान्तार्थमानयामास गणिकाभिः सहानघ। रामलक्ष्मणशत्रुघ्नभरताश्चैव भारत॥ ऋष्यशृंगश्च शान्ता च तथारूपैः नटैः कृताः॥ इत्युक्तमनन्तरम्॥ रंभाभिसारं कौवेरं नाटकं ननृतुस्ततः॥ शूरो रावणरूपेण रंभा वेषा मनोवती। नलकूबरस्तु प्रद्युम्नः सांबस्तस्य विदूषकः॥ कैलासे रूपितश्चापि मायया यदुनन्दनैः। शापश्च दत्तःक्रुधेन रावणस्य दुरात्मनः॥ नलकूबरेण च यथा रंभा-वाप्यथ सान्त्विता। एतत्प्रकरणं वीरा ननृतुर्यदुन-न्दनारिति॥ तवास्मि जानकीनाथ तवास्मि रघु-नन्दन। रक्ष मां करुणासिन्धो पाहि मां दीनवत्सलः॥

इति श्रीसीतारामीय परमहंसपरिव्राजक हरिहरप्रसादविर-चितः श्रीरामलीलातत्त्वभास्करः समाप्तः॥

हरिःओं श्रीसीतारामार्पणमस्तु॥

इति श्रीअयोध्याशृंगारभवननिवासि वैष्णव पं॰रामनारायणदासेन संशोधितः श्रीरामलीलातत्त्वभास्करः समाप्तः॥ श्रीरस्तु॥